# Shri Durga Saptashati Sahasra Nama Stotram

# શ્રીદુર્ગાસપ્તશતીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Durga Saptashati Sahasra Nama Stotram

File name : saptashatIsahasranAmastotram.itx

Category : devii, sahasranAma, durgA, shatI, devI, saptashatI

Location : doc_devii

Author : Batohi Jha

Proofread by : Kavitha Aanand

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# શ્રીદુર્ગાસપ્તશતીસહસ્રનામસ્તોત્રમ્

નમસ્તસ્યૈ ।
ૐ અમ્બા કાત્યાયની કાલી કમલા કરુણામયી ।
અતુલા કાલિકા કૃષ્ણા કલ્યાણી કામરૂપિણી ॥ ૧॥

અર્ધમાત્રાસ્થિતા કર્ત્રી કાલાતીતા કલાધરી ।
અનુચ્ચાર્યા ચ કામાક્ષી ક્રુદ્ધા કૈટભહારિણી ॥ ૨॥

અનાયસ્તાનના ખ્યાતિઃ કાન્તિરૂપાઽતિસુન્દરી ।
અમ્બિકા કામધેનુશ્ચ કામદા ચાખિલાત્મિકા ॥ ૩॥

અરવિન્દસ્થિતા પદ્મા કુબ્જિકા કરુણા કૃતિઃ ।
અરુણા ચારૂણક્ષૌમા કુપિતાઽરુણલોચના ॥ ૪॥

અખિલદેવપૂજ્યા ચ કમલા કનકામ્બરા ।
અલક્ષ્મીઃ કાલરાત્રિશ્ચ કૂષ્માણ્ડા કાલરૂપિણી ॥ ૫॥

અપારા કીર્તિતા ગૌરી કૌમારી કરુણાર્ણવા ।
અવ્યાકૃતા જગન્મૂર્તિશ્ચાવિચિન્ત્યમહાવ્રતા ॥ ૬॥

અખિલશાસ્ત્રસારા ચ દેવી કારુણ્યરૂપિણી ।
અવતારત્રયાઽસઙ્ગા દુર્ગા કામફલપ્રદા ॥ ૭॥

અતિસાધુમતિર્જાયા જયન્તી ચાપરાજિતા ।
અપરાઽતુલ્યરૂપા ચ નિત્યાઽસુરનિબર્હિણી ॥ ૮॥

અસુરવીર્યહન્ત્રી ચ નારી કનકભૂષણા ।
આદ્યાઽતિહારિરૂપા ચ કિરીટિની કુલેશ્વરી ॥ ૯॥

અતિસૌમ્યાઽતિરૌદ્રા ચ કનકોત્તમભૂષણા ।
અતિશુદ્ધગુણાઽભેદ્યા ચાનુપમપરાક્રમા ॥ ૧૦
અયોનિજાઽતિચાર્વઙ્ગી કામિકાઽભીષ્ટસંશ્રયા ।

વિસ્તારવદનાઽનન્તા કોપવત્યતિભીષણા ॥ ૧૧॥

અણિમાદિમયૂખાપ્તા કામિની ચામલાનના ।
અર્ધામ્બિકેશરૂપા ચ કાલાભ્રાભાઽસિપાશિની ॥ ૧૨॥

અત્યુગ્રાઽનન્તવીર્યા ચ કપાલિન્યતિકોપના ।
જયાઽખિલજગન્માતા કામેશ્વર્યતિમાનિની ॥ ૧૩॥

અગ્નિવર્ણાઽદ્વિતીયા ચ કૌબેરી ચાખિલેશ્વરી ।
અતિરૌદ્રાવતારા ચ ઘોરા ચાસુરઘાતિની ॥ ૧૪॥

અજ્ઞેયાઽપઃસ્વરૂપા ચ કિરીટોલ્લિખિતામ્બરા ।
અર્ગલાઽલઙ્ઘ્યવીર્યા ચ જ્વલન્તી ચાનલાત્મિકા ॥ ૧૫॥

અનજા જનની નન્દા ગુહ્યધ્યાનાઽગ્નિદેવતા ।
અનઘા ઘોરરૂપા ચ નિયતાઽનાથસંસ્તુતા ॥ ૧૬॥

અજા ગુહ્યતરધ્યાના ચારિસઙ્ક્ષયકારિણી ।
અજિતાઽન્તર્હિતાઽલક્ષ્યા ગુણાશ્રયાઽમિતપ્રભા ॥ ૧૭॥

અભિષ્ટુતા દયારૂપા ચાલઙ્કૃતચતુર્ભુજા ।
આર્યાઽમૃતકલાઽવિદ્યા નીલવર્ણાઞ્જનપ્રભા ॥ ૧૮॥

અચિન્ત્યચરિતાઽમર્ત્યા જગન્માતાઽમ્બુજાસના ।
અષ્ટાદશભુજાઽપર્ણા ચાભીષ્ટફલદાયિકા ॥ ૧૯॥

અલઙ્કૃતભુજાઽતીતા નન્દજાઽભયહસ્તકા ।
અષ્ટભુજા જગદ્ધાત્રી જગત્ત્રયહિતૈષિણી ॥ ૨૦॥

અસમાઽઽનન્દરૂપા ચ પ્રથમાઽગોચરાઽકલા ।
અનાનન્દસ્વરૂપાઽપિ નવદુર્ગાઽષ્ટમાતૃકા ॥ ૨૧॥

અનામયી હ્યવિજ્ઞાના નિરાકારાઽવિનાશિની ।
અમલાઽબ્રહ્મરૂપા ચ ચણ્ડી ચરાચરેશ્વરી ॥ ૨૨॥

અપઞ્ચભૂતરૂપા ચ ચન્દ્રરેખાવિભૂષણા ।
પરમાઽખિલરૂપા ચ ચણ્ડમુણ્ડવિનાશિની ॥ ૨૩॥

ચેતનાઽવેદરૂપા ચ ચણ્ડિકા ચણ્ડવિક્રમા ।
ઉર્ધ્વમધઃસ્વરૂપા ચ તિર્યગ્રૂપા તમોગુણા ॥ ૨૪॥

અસુરનાશયિત્રી ચ ચિત્રાભરણભૂષિતા ।
અદિતિર્દેવશક્તિશ્ચ દીનત્રાણપરાયણા ॥ ૨૫॥

અભયદા મહાગૌરી મહાભયવિનાશિની ।
અનાદિશ્ચ નિરાધારા નયનત્રયશોભિતા ॥ ૨૬॥

અવિચલા ચતુર્બાહુશ્ચન્દ્રઘણ્ટા ચ ચર્ચિકા ।
એકાઽભેદમયી નૈકા તુષ્ટા કલ્યાણશોભના ॥ ૨૭॥

ગૌરીદેહસમુત્પન્ના નીલગ્રીવાઽવિકારિણી ।
કલાકાષ્ઠાદિરૂપા ચ ચક્રિણી કૃષ્ણસંસ્તુતા ॥ ૨૮॥

કનકોત્તમકાન્તિશ્ચ ચિત્રઘણ્ટાઽઘહારિણી ।
આદ્યવાક્યમયી પૂજ્યા ચાર્તત્રાણપરાયણા ॥ ૨૯।
આરાધિતાઽઽત્મમૂર્તિશ્ચ તેજોરાશિસમુદ્ભવા ।
આદિવિદ્યાઽઽત્મશક્તિશ્ચ તુહિનાચલસંસ્થિતા ॥ ૩૦॥

આનન્દવિગ્રહા તુષ્ટિસ્તારિણી તનુમધ્યમા ।
આદિઃ કનકવર્ણાભા પૂર્ણાઽઽનન્દપયોનિધિઃ ॥ ૩૧॥

ઈશાઽઽનન્દમયી બ્રાહ્મી બ્રહ્માણીરૂપધારિણી ।
વરાઽઽપચ્છમની વિદ્યા ભદ્રાઽઽભરણભૂષિતા ॥ ૩૨॥

ઇન્દુયોગ્યાનના ચૈન્દ્રી દૈત્યવધકૃતોદ્યમા ।
ઇન્દુશકલભૂષા ચ ભવતી ભક્તવત્સલા ॥ ૩૩॥

ઇન્દ્રાણી ચેન્દુરૂપા ચ પ્રાતઃસૂર્યસમપ્રભા ।
ઇન્દિરેન્દુ કિરીટા ચ રવિચન્દ્રાગ્નિલોચના ॥ ૩૪॥

ઉગ્રનૃસિંહરૂપા ચ ગુણત્રયવિભાવિની ।
ઈશ્વરી ચૈકવીરા ચ ગૌરીદેહસમુદ્ભવા ॥ ૩૫॥

ઉદ્યોતિની મહારૌદ્રા ચેન્દ્રાણીપતિપૂજિતા ।
ઉમા ચેન્દુપ્રભા પત્ની પરિણામપ્રદાયિની ॥ ૩૬॥

ઈષદ્ધાસા મહાદેવી મહામાયા મહેશ્વરી ।
ઉન્મદા ભીમરૂપા ચ ભીમાદેવી ચ ભીષણા ॥ ૩૭॥

ઉત્તમભૂષણા લક્ષ્મીઃ લોકેશ્વરી ચ લાસિની ।
ઉદારસંસ્તુતા બુદ્ધિર્બ્રહ્માણી બોધલક્ષણા ॥ ૩૮॥

ઋદ્ધિદાત્રી રમા રૌદ્રા રક્તાલિપ્તપયોધરા ।
રક્તબીજવધા રુષ્ટા ચોલ્લસદ્રત્નકુણ્ડલા ॥ ૩૯ ॥

સુકર્મફલજુષ્ટા ચ કાન્તિભૃત્કમલાલયા ।
કૌમારીરૂપસંસ્થાના કૌશિકી કાન્તિશાલિની ॥ ૪૦ ॥

કહ્લારાબદ્ધમાલા ચ લલિતા કમલાસના ।
કરુણાપૂરિતાક્ષી ચ તથોત્પલવિલોચના ॥ ૪૧ ॥

રુચિરોત્તમકાન્તિશ્ચ ખડ્ગિની ખડ્ગધારિણી ।
ઘનસ્તની તથોત્તુઙ્ગસ્તની પીનપયોધરા ॥ ૪૨ ॥

ધ્રુવોર્ધ્વકેશિની ધૂમ્રા ધાત્રી ધૂમ્રાક્ષમર્દિની ।
ધનુર્ધરી ચ દુર્ધર્ષા દુર્ગા ચ ધર્મધારિણી ॥ ૪૩ ॥

કૌશામ્ભઃક્ષરિકા લજ્જા લોચનત્રયભૂષિતા ।
લક્ષ્યાલક્ષ્યસ્વરૂપા ચ લોકખ્યાતા ફલપ્રદા ॥ ૪૪ ॥

કરાલવદના સન્ધ્યા ક્રોધસમાકુલા ક્ષુધા ।
સુકામધેનુમૂર્તિશ્ચ ખડ્ગાદિભૃચ્ચ ખેચરી ॥ ૪૫ ॥

સૌમ્યા કાન્તિપ્રતિષ્ઠા ચ ગદિની ગુહરૂપિણી ।
ગમ્ભીરાન્તઃ સ્મિતા સુભ્રૂઃ સ્ત્રીરત્નં સુમનોહરા ॥ ૪૬ ॥

ગજરાજસ્થિતા સિદ્ધિઃ શુદ્ધા ગરુડસંસ્થિતા ।
ગુણમયી મહાવજ્રા મહાઘોરપરાક્રમા ॥ ૪૭ ॥

ગૃહીતોગ્રમહાચક્રા ગૃહીતપરમાયુધા ।
ગૃહવૃદ્ધિપ્રદા સારા સુપથા ગરુડાસના ॥ ૪૮ ॥

શક્તિર્ગજસમારૂઢા સર્વસૌભાગ્યદાયિની ।
ગુહ્યેશ્વરી મહાવિદ્યા ગુહ્યગોપ્ત્રી પ્રકીર્તિતા ॥ ૪૯ ॥

સતી ગમ્ભીરનાભિશ્ચ ચિકિતુષી ચતુર્ભુજા ।
ગુહ્યાતિગુહ્યગોપ્ત્રી ચ પૂજિતા પ્રમદોત્તમા ॥ ૫૦ ॥

ઘનાન્તશશિતુલ્યાભા ચિન્મયી ચિત્રકાન્તિભૃત્ ।
ચણ્ડઘાતી ચ ચામુણ્ડા સૃષ્ટિશ્ચિત્તકૃપામયી ॥ ૫૧ ॥

ચિત્રભ્રમરપાણિશ્ચ ચિતિરૂપા ચ ચાપિની ।
સીતા ચઞ્ચલાપાઙ્ગી સિતા ચિત્રવિભૂષણા ॥ ૫૨ ॥

તૈજસી ચિન્મયાતીતા ચૂડામણિર્મહાબલા ।
દેવેશી ચિન્મયાનન્દા સા ચતુર્વક્ત્રસંસ્તુતા ॥ ૫૩ ॥

જ્યોત્સ્ના ચન્દ્રાર્ધચૂડા ચ ચિત્રમાલ્યા મહાસ્મૃતિઃ ।
ચિત્રકોદ્ભાસિભાલા ચ ચિત્રામ્બરા મહાસુરી ॥ ૫૪ ॥

તામસી ચણ્ડિકાશક્તિઃ શિવાશતનિનાદિની ।
જયાખ્યા જગતાં ધાત્રી જાતિરૂપા પ્રદર્શિની ॥ ૫૫ ॥

છાયારૂપા ચ પાપઘ્ની નિદ્રા ચિત્રાનુલેપના ।
છત્રેશ્વરી શતાક્ષી ચ શત્રુભયવિવર્ધિની ॥ ૫૬ ॥

જગદાધારભૂતા ચ જગદમ્બા જગન્મયી ।
પુષ્ટિર્જગત્પ્રતિષ્ઠા ચ પાવના જગદમ્બિકા ॥ ૫૭ ॥

જ્વાલામુખી મહારાવા જિહ્વાલલનભીષણા ।
સર્વા જગત્સમસ્તસ્ત્રી ભૈરવી જમ્ભનાદિની ॥ ૫૮ ॥

સા જગજ્જનની શ્યામા શોભના શશિશેખરા ।
સા જગત્પાલિકા શ્રદ્ધા શામ્ભવી શૂલધારિણી ॥ ૫૯ ॥

તૃષ્ણારૂપા તૃષા શર્વા તુષ્ટિરૂપા ચ પાલિકા ।
તુઙ્ગકુચા ત્રિનેત્રા ચ તામ્રામ્ભોજનિવાસિની ॥ ૬૦ ॥

તપ્તકાઞ્ચનવર્ણાભા તપ્તકાઞ્ચનભૂષણા ।
તીક્ષ્ણનખા ચ નિષ્ઠીલા નવશક્તિસ્તનૂદરી ॥ ૬૧ ॥

તેજોમણ્ડલદુર્ધર્ષા તાણ્ડવલાસિની શિવા ।
તૃષ્ણા તપોજ્વલન્તી ચ પૂતના તલવાસિની ॥ ૬૨ ॥

દુર્વૃત્તવૃત્તહન્ત્રી ચ દુર્ગપારા ચ દણ્ડિની ।
દિવાકરનિભા રાષ્ટ્રી દૈત્યદર્પવિનાશિની ॥ ૬૩ ॥

દ્વીપિચર્મપરીધાના દંષ્ટ્રોદ્ધૃતવસુન્ધરા ।
નયનત્રયયુક્તા ચ દારુણા દશનોજ્જ્વલા ॥ ૬૪ ॥

સ્વાહા દંષ્ટ્રાકરાલાસ્યા દુર્ગમા દ્વારવાસિની ।
દશવક્ત્રા ચ દુષ્પ્રેક્ષ્યા દંષ્ટ્રાઙ્કિતવરાનના ॥ ૬૫ ॥

દેવતા દશવિદ્યા ચ દારિદ્યદુઃખહારિણી ।

સ્તુતા દંષ્ટ્રાકરાલી ચ ભવસાગરનૌઃ ક્ષમા ॥ ૬૬॥

દુરત્યયા મહાકાલી મૃડાની દુરિતાપહા ।
દશભુજા મહામારી દશપાદા દશાનના ॥ ૬૭॥

દિવ્યમૂર્તિર્મહાવાણી સુધા દેવોપકારિણી ।
દુર્ગાર્તિનાશિની ક્ષાન્તિર્દુરાચારવિઘાતિની ॥ ૬૮॥

દુર્ગતિહારિણી દુર્ગા સ્વરા દશનભાસુરા ।
ભર્ત્રી દાનવહન્ત્રી ચ સા દુષ્ટદમની તથા ॥ ૬૯॥

દુરિતશમની રાધા વિહારિણી વિલાસિની ।
રૂદ્રરૂપા ચ રુદ્રાણી ભવાની ભવભામિની ॥ ૭૦॥

દુર્ગપ્રશમની દુર્ગા સા દંષ્ટ્રાભાસુરા તથા ।
વાણી ધૃતેન્દુલેખા ચ સા દક્ષદુહિતા સુખા ॥ ૭૧॥

ધનુર્બાણધરા દુર્ગા નિજશસ્ત્રાસ્ત્રવર્ષિણી ।
દુર્ગા ધૂર્જટિપત્ની ચ નાનારત્નોપશોભિતા ॥ ૭૨॥

શક્તિસમૂહમૂર્તિશ્ચ નિદ્રારૂપા ચ ધીશ્વરી ।
નન્દગોપગૃહોત્પન્ના વેદગર્ભા વ્રજેશ્વરી ॥ ૭૩॥

વેદત્રયી ચ ધેનુર્વાક્ નૈરૃતિર્નલકૂબરી ।
નારાયણી મહાલક્ષ્મીર્નીલોત્પલવિલોચના ॥ ૭૪॥

વિલસચ્ચોલિકા દુર્ગા ધર્મમતિપ્રદાયિની ।
નાનાભરણશોભાઢ્યા નિશુમ્ભાસુરઘાતિની ॥ ૭૫॥

નાનાશસ્ત્રકરા દુર્ગા સા નીલાશ્મદ્યુતિઃ સ્વધા ।
નવનવસ્વરૂપા ચ નાગાધીશ્વરવિષ્ટરા ॥ ૭૬॥

ત્રયી નિખિલમૂર્તિશ્ચ નયનત્રયભાસિતા ।
સા નીરજકરા દુર્ગા નાદાપૂર્ણદિગમ્બરા ॥ ૭૭॥

પ્રસન્ના પરમા વિદ્યા પરા ચ પરમેશ્વરી ।
સા પુણ્ડરીકમધ્યસ્થા પ્રકૃતિઃ પુત્રદાયિની ॥ ૭૮॥

પાપપ્રશમિની દુર્ગા નરમાલાવિભૂષણા ।
પાપાપહારિણી દુર્ગા નાદાપૂરિતદિઙ્મુખા ॥ ૭૯॥

સા પઞ્ચભૂતરૂપા ચ નિમગ્નારક્તલોચના ।
નારસિંહી ભયત્રાત્રી નિશુમ્ભમર્દિની તથા ॥ ૮૦॥

નીલભુજા મહારાત્રિર્દુર્ગા નાનાભિધાનભૃત્ ।
માતઙ્ગી નીલજઙ્ઘોરુર્નિશુમ્ભમથિની તથા ॥ ૮૧॥

પદ્માવતી પરોક્તિશ્ચ પ્રપન્નાર્તિહરા તથા ।
પ્રતિષ્ઠા પર માયા પાર્વતી પાપનાશિની ॥ ૮૨॥

સા પરમાર્તિહન્ત્રી ચ પરમા પ્રકૃતિસ્તથા ।
પ્રસાદસુમુખી દુર્ગા સુપ્રસન્નાનના તથા ॥ ૮૩॥

પરિતુષ્ટા મહામેધા ભવાની પરમાયુધા ।
પ્રેતસંસ્થા ચ ભીમાક્ષી પદ્મહસ્તા હરિપ્રિયા ॥ ૮૪॥

પદ્માસના મહાપૂર્વા પુણ્યેશ્વરી ચ યોગિની ।
પાપેશ્વરી મહામોહા પીનસ્તની સમસ્તની ॥ ૮૫॥

પ્રચણ્ડદૈત્યદર્પઘ્ના પાશાઙ્કુશધરા તથા ।
પ્રતિમા પરિપૂર્ણા ચ પરધામનિવાસિની ॥ ૮૬॥

સા પરા દેવતા દુર્ગા ફલદા પ્રતિપાલિકા ।
પરશિવા ચ શર્વાણી સા શમ્ભુગૃહિણી તથા ॥ ૮૭॥

પરસિદ્ધિપ્રદા ભૂતિઃ સા પ્રલયમયી તથા ।
બ્રહ્મસ્તુતા ચ સાવિત્રી બુદ્ધિરૂપા ચ ભારતી ॥ ૮૮॥

બદ્ધ હિમાંશુરત્નાભા ભુશુણ્ડીપરિઘાયુધા ।
બ્રહ્મશક્તિશ્ચ યજ્ઞિયા, સુષ્ટુતા ફલદાયિકા ॥ ૮૯॥

બન્ધૂકકાઞ્ચનાભા ચ બાલરવિદ્યુતિસ્તથા ।
બાધાપ્રશમની દુર્ગા બીજરૂપા ચ બાભ્રવી ॥ ૯૦॥

બાલાર્કમણ્ડલાભાસા બહુકન્યાસુસેવિતા ।
બ્રહ્માદિરૂપિણી દુર્ગા મઙ્ગલા બ્રહ્મચારિણી ॥ ૯૧॥

બ્રહ્મસ્વરૂપિણી મેધા બ્રહ્મરૂપા સુરેશ્વરી ।
ભક્તકામદુધા દુર્ગા સા બાધાહારિણી તથા ॥ ૯૨॥

દુર્ગા ભક્તાનુરક્તા ચ ભગવતી ચ ભૂષિતા ।
ભુક્તિપ્રદાયિની દુર્ગા ભદ્રકાલી સનાતની ॥ ૯૩॥

ભાનુસહસ્રકાન્તિશ્ચ ભૂભૃલ્લક્ષ્મીશ્ચ શઙ્ખિની ।
ભ્રાન્તિરૂપા મહોત્સાહા ભાસ્વદ્દેહલતા તથા ॥ ૯૪॥

ભુવનેશી વિશોકા ચ દુર્ગા ભૈરવનાદિની ।
ભક્તિસ્મૃતા સુગન્ધા ચ ભ્રામરી ભૂમિસમ્ભવા ॥ ૯૫॥

દુર્ગા ભૂમુક્તિહેતુશ્ચ ભક્તાનન્દોદયા તથા ।
સા ભિન્નાઞ્જનસઙ્કાશા ભોગસ્વર્ગાપવર્ગદા ॥ ૯૬॥

દુર્ગા ભ્રામરરૂપા ચ ભૂતસ્થિતિવિધાયિની ।
ભાષાક્ષરા સુમાતા દુર્ગા ભૂતાર્તિહારિણી ॥ ૯૭॥

સા મુક્તિહેતુભૂતા ચ દુર્ગા ભયવિનાશિની ।
માતૃરૂપા સુરૂપા ચ સંહર્ત્રી ભવતારિણી ॥ ૯૮॥

મુક્તિહેતુઃ સુરશ્રેષ્ઠા સન્મયી ભયહારિણી ।
માહેશ્વરી શરણ્યા ચ દુર્ગા ભેદપ્રદર્શિની ॥ ૯૯॥

મૌલિબદ્ધેન્દુરેખા ચ મહાવૃષભવાહિની ।
સા મહાકાલિકા માતા મધુકૈટભઘાતિની ॥ ૧૦૦॥

મહાહિવલયા માયા તથા મહિષવાહિની ।
મોહરાત્રિશ્ચ વારાહી સુમધુમદમાધુરી ॥ ૧૦૧॥

દુર્ગા માતૃગણા વૃદ્ધિર્મયૂરવરવાહના ।
માલાધરી ચ સર્વાદ્યા મહાશક્તિધરા તથા ॥ ૧૦૨॥

માહેશ્વરીસ્વરૂપા ચ સુન્દરી મુકુટેશ્વરી ।
દુર્ગા મહીસ્વરૂપા ચ મહાકારુણ્યરૂપિણી ॥ ૧૦૩॥

મહામારીસ્વરૂપા ચ માતૃકા મુનિસંસ્તુતા ।
મહિષાસુરનિર્ણોશી દુર્ગા મૃગપ્રતિસ્થિતા ॥ ૧૦૪॥

મૂર્તિરૂપા ચ સર્વેશા મયૂરકુક્કુટાવૃતા ।
મુક્તિપ્રદાયિની દુર્ગા સુભગા મહિષાસના ॥ ૧૦૫॥

મહિષાન્તકરી દુર્ગા ત્રિગુણા મૃગવાહિની ।
સા મુણ્ડમથના દુર્ગા શુભા મહિષમર્દિની ॥ ૧૦૬॥

ત્ર્યમ્બકા યોગનિદ્રા ચ મહાત્રિપુરસુન્દરી ।

સાક્ષિણી યમઘણ્ટા ચ મહાદુર્ગવિનાશિની ॥ ૧૦૭॥

યજ્ઞિયપ્રથમા દુર્ગા શ્રીપ્રદા મન્ત્રમાતૃકા ।
દુર્ગા યોગેશ્વરી શાન્તિઃ શૂલિની મધુમર્દિની ॥ ૧૦૮॥

રુક્મામ્બુજાસના દુર્ગા શાઙ્કરી મહિષાર્દિની ।
સા રુચિરાક્ષમાલા ચ સત્વરા મન્ત્રરૂપિણી ॥ ૧૦૯॥

સા મૂલપ્રકૃતિર્દુર્ગા મૂલાધારનિવાસિની ।
મહાવિલાસિની દુર્ગા મોહિની મુનિમોહિની ॥ ૧૧૦॥

દુર્ગા રૂપપ્રતિષ્ઠા ચ યશોદાગર્ભસમ્ભવા ।
વૈષ્ણવી રથમારૂઢા રત્નભૂતા યશસ્વિની ॥ ૧૧૧॥

શિવદા રક્તવર્ણા ચ વિજયા રૂપશાલિની ।
વારુણી રક્તવસ્ત્રા ચ દુર્ગા રક્તામ્બરા તથા ॥ ૧૧૨॥

સુગતા રક્તપાદા ચ સકલા રક્તદન્તિકા ।
સાકારા રક્તમધ્યા ચ રક્તસર્વાઙ્ગભૂષણા ॥ ૧૧૩॥

સુકાન્તી રક્તનેત્રા ચ રક્તકેશાતિભીષણા ।
સા રક્તદશના દુર્ગા રક્તતીક્ષ્ણનખા તથા ॥ ૧૧૪॥

સા દુર્ગા રક્તચામુણ્ડા દુર્ગા રક્તાયુધા તથા ।
સા દુર્ગા રક્તકેશા ચ રણત્કઙ્કણનૂપુરા ॥ ૧૧૫॥

સા રક્તવસના દુર્ગા રક્તદન્તી ત્રિધોદિતા ।
રસભાવિતવૃત્તા ચ દુર્ગા રત્નવિભૂષિતા ॥ ૧૧૬॥

સા લમ્બોદરમાતા ચ લક્ષ્મીરૂપા ચ વાક્ તથા ।
દુર્ગા લજ્જાસ્વરૂપા ચ સા લોકવરદા તથા ॥ ૧૧૭॥

વૃત્તસ્તની તથા દુર્ગા વિશાલા વસુધાસમા ।
દુર્ગા વિજ્ઞાનરૂપા ચ તથા વૃત્તપયોધરા ॥ ૧૧૮॥

વરદા વેદરૂપા ચ દુર્ગા વિશ્વેશ્વરી તથા ।
વ્યાપ્તલોકત્રયા દુર્ગા વરાભીતિપ્રધારિણી ॥ ૧૧૯॥

વૈરિદયાવતી દુર્ગા વન્દિતાઙ્ઘ્રિયુગા તથા ।
સા દુર્ગા વિષ્ણુમાયા ચ વ્યાપ્તસ્થાવરજઙ્ગમા ॥ ૧૨૦॥

વલ્લકીવાદિકા દુર્ગા વિશ્વસમ્મોહિની તથા ।
વિશ્વોપરતિશક્તા ચ દુર્ગા વેધસ્સ્તુતા તથા ॥ ૧૨૧॥

સા દુર્ગા વૃત્તિરૂપા ચ ચિત્રખટ્વાઙ્ગધારિણી ।
સા દુર્ગા વ્યાપ્તિદેવી ચ વિશ્વવિભ્રામિકા તથા ॥ ૧૨૨॥

વૃષારૂઢા તથા દુર્ગા વિદ્યુદ્દામસમપ્રભા ।
વરદાભીતિહસ્તા ચ દુર્ગા વિસ્તારિતાનના ॥ ૧૨૩॥

વજ્રહસ્તા તથા દુર્ગા વિદ્યામયી વ્યવસ્થિતા ।
વૃત્રપ્રાણહરા દુર્ગા વિન્ધ્યાચલનિવાસિની ॥ ૧૨૪॥

વરાહરૂપિણી દુર્ગા વિશ્વાર્તિહારિણી તથા ।
સા દુર્ગા વૈષ્ણવી શક્તિર્વિશ્વબીજં ત્રિલોચના ॥ ૧૨૫॥

સા દુર્ગા વૈષ્ણવીરૂપા તથા વ્યાધિવિનાશિની ।
દુર્ગા વિવેકદીપા ચ વીણાપુસ્તકધારિણી ॥ ૧૨૬॥

વિશાલલોચના દુર્ગા સા વિશ્વપરિપલિકા ।
સા વિશ્વધારિણી દુર્ગા તથા વૈરિવિનાશિની ॥ ૧૨૭॥

વિશ્વાત્મિકા તથા દુર્ગા વિધાતૃવરદા તથા ।
દુર્ગા વિશ્વેશવન્દ્યા ચ દુર્ગા ચ વિત્તદાયિની ॥ ૧૨૮॥

વ્યાપ્તસકલવિશ્વા ચ દુર્ગા ચ વૃષવાહના ॥

વાગીશ્વરી તથા દુર્ગા સા વિદ્યાકારિણી તથા ॥ ૧૨૯॥

દુર્ગા વિજ્ઞાનદાત્રી ચ દુર્ગા ચ વિન્ધ્યવાસિની ।
સા વિશ્વમોહિની દુર્ગા તથૈવ વિશ્વરૂપિણી ॥ ૧૩૦॥

વજ્રપાણિસ્તથા દુર્ગા તથૈવ વરદાયિની ।
વિશ્વમાતા તથા દુર્ગા તથૈવ વજ્રધારિણી ॥ ૧૩૧॥

વસુસઙ્ગમની દુર્ગા તથા વરદહસ્તકા ।
વિખ્યાતિગા તથા દુર્ગા તથૈવ વાગધીશ્વરી ॥ ૧૩૨॥

વાઞ્છાકલ્પદ્રુમા દુર્ગા વૈરોચની વિભૂષિતા ।
સા વિકટસ્વરૂપા ચ દુર્ગા વિધિવધૂસ્તથા ॥ ૧૩૩॥

શોભાધારા તથા દુર્ગા વિમલા શમિતાશિવા ।

વિવસના તથી દુર્ગા સા શિરોમાલિકા તથા ॥ ૧૩૪॥

શઙ્ખચક્રગદાહસ્તા શઙ્ખાદિપરમાયુધા ।
શ્રીસ્તથા શ્યામલાઙ્ગી ચ દુર્ગા શ્રીસુન્દરી તથા ॥ ૧૩૫॥

સા શુભમતિદા દુર્ગા શુભગતિપ્રદાયિની ।
શ્વેતરૂપધરા દુર્ગા તથા શોકવિનાશિની ॥ ૧૩૬॥

શશિમૌલિપ્રતિષ્ઠા ચ દુર્ગા શબ્દાત્મિકા તથા ।
સા શત્રુભયરૂપા ચ શુમ્ભદૈત્યાર્દિની તથા ॥ ૧૩૭॥

સા દુર્ગા શક્તિરૂપા ચ શુષ્કમાંસાતિભૈરવા ।
સા દુર્ગા શાન્તિરૂપા ચ સા શબ્દજ્ઞાનરૂપિણી ॥ ૧૩૮॥

શ્રદ્ધારૂપા તથા દુર્ગા શુમ્ભનિબર્હિણી તથા ।
સા દુર્ગા શુભહેતુશ્ચ સા શૂન્યાશૂન્યસાક્ષિણી ॥ ૧૩૯॥

શઙ્ખપાત્રા તથા દુર્ગા શિરોમાલાવિભૂષણા ।
સા દુર્ગા શક્તિહસ્તા ચ સા શૂલચક્રભૃત્તથા ॥ ૧૪૦॥

સા શિવશક્તિરૂપા ચ દુર્ગા શશિમુખી તથા ।
શિવદૂતી તથા દુર્ગા સા શુમ્ભમર્દિની તથા ॥ ૧૪૧॥

સા શરણાગતત્રાણા દુર્ગા શાસ્ત્રમયી તથા ।
સા પરમાયુધા દુર્ગા તથૈવ શવવાહના ॥ ૧૪૨॥

શિવદૂતીસ્વરૂપા ચ દુર્ગા શાકમ્ભરી તથા ।
શ્રીશામ્ભવી તથા દુર્ગા તથૈવ શિખિવાહના ॥ ૧૪૩।
સા દુર્ગા શૈલપુત્રી ચ દુર્ગા શશિધરા તથા ।
સા દુર્ગા શ્રીમહાવિદ્યા દુર્ગા શૂલેશ્વરી તથા ॥ ૧૪૪॥

શુમ્ભહન્ત્રી તથા દુર્ગા સા શ્મશાનવિહારિણી ।
શક્તિધરી તથા દુર્ગા સકલોદ્ધારિણી તથા ॥ ૧૪૫।
સા દુર્ગા સત્યરૂપા ચ દુર્ગા શબ્દમયી તથા ।
સકલશબ્દરૂપા ચ સા ભક્તિરસભાવિતા ॥ ૧૪૬॥

શ્વેતાનના તથા દુર્ગા સર્વકામફલપ્રદા ।
સ્ફુરત્કાન્તિસ્તથા દુર્ગા સર્વરૂપમયી તથા ॥ ૧૪૭॥

દુર્ગા સર્વાઙ્ગભૂષા ચ તથા સર્વજગન્મયી ।

સંસારબન્ધહેતુશ્ચ તથા સર્વેશ્વરેશ્વરી ॥ ૧૪૮॥

વષટ્કારા તથા દુર્ગા સ્થિતિસંહારકારિણી ।
સ્વરાત્મિકા તથા દુર્ગા સમુત્પન્ના તથા સ્વયમ્ ॥ ૧૪૯॥

સા દુર્ગા સૃષ્ટિરૂપા ચ સા સરોજસ્થિતા તથા ।
સ્થિતિરૂપા તથા દુર્ગા સદાભ્યુદયદા તથા ॥ ૧૫૦॥

દુર્ગા સંહૃતિરૂપા ચ તથૈવ સિંહવાહિની ।
સમ્માનિતા તથા દુર્ગા તથા સૈરિભમર્દિની ॥ ૧૫૧॥

સુરર્ષિસ્તૂયમાનાચ સિદ્ધિકામસુસેવિતા ।
સિંહસ્કન્ધાધિરૂઢા ચ દુર્ગા સર્વાશ્રયા તથા ॥ ૧૫૨॥

દુર્ગા સર્વજગદ્ધાર્તા તથા સૂર્યસમપ્રભા ।
સા સમસ્તજગદ્ હેતુઃ સ્મૃતિભીતિહરા તથા ॥ ૧૫૩॥

સા દુર્ગા સર્વશક્તિશ્ચ દુર્ગા સૌમ્યતરા તથા ।
સા સર્વવ્યાપિની દુર્ગા તથા સમરનિષ્ઠુરા ॥ ૧૫૪॥

દુર્ગા સદાઽઽર્દ્રચિત્તા ચ દુર્ગા ચ સર્વકારિણી ।
સ્મૃતિરૂપા તથા દુર્ગા સહસ્રનયના તથા ॥ ૧૫૫॥

દુર્ગા સમસ્તવિદ્યા ચ દુર્ગા સરસ્વતી તથા ।
દુર્ગા સ્ત્રીરત્નભૂતા ચ સાક્ષસૂત્રકમણ્ડલુઃ ॥ ૧૫૬॥

અબ્જન્યસ્તૈકપાદા ચ તથા સર્વાર્થસાધિકા ।
સા સર્વઙ્ગેશ્વરાઙ્કુસ્થા સર્વેશક્તિસમન્વિતા ॥ ૧૫૭॥

સ્મેરમુખી તથા દુર્ગા સ્વર્ગમુક્તિપ્રદાયિની ।
સા દુર્ગા સર્વભૂતા ચ સર્વયોગસમન્વિતા ॥ ૧૫૮।
સર્વમઙ્ગલમઙ્ગલ્યા સંસારાર્ણવતારિણી ।
સૃષ્ટ્યાદિશક્તિભૂતા ચ સ્વર્ગાપવર્ગદા તથા ॥ ૧૫૯॥

સ્તવ્યપરા તથા દુર્ગા સહસ્રનયનોજ્જ્વલા ।
સા સર્વભીતિપાત્રી ચ સિંહસ્થા સર્વમઙ્ગલા ॥ ૧૬૦॥

સર્વસ્યાર્તિહરા દુર્ગા સર્વાભરણભૂષિતા ।
દુર્ગા સર્વસ્વરૂપા ચ સર્વકામપ્રદાયિની ॥ ૧૬૧॥

સિદ્ધિદાત્રી તથા દુર્ગા સ્વર્ણાકલ્પિતકુણ્ડલા ।

સમ્પૂજિતા તથા દુર્ગા સર્વશત્રુવિનાશિની ॥ ૧૬૨॥

સા દુર્ગા સ્કન્દમાતા ચ દુર્ગા સર્વગતા તથા ।
સા સૌભાગ્યપ્રતિષ્ઠા ચ દુર્ગા સપ્તશતી તથા ॥ ૧૬૩।
સા સત્ત્વાખ્યગુણા દુર્ગા સર્વસત્ત્વમયી તથા ।
સુરાસુરશિરોરત્નનિઘૃષ્ટચરણા તથા ॥ ૧૬૪॥

સ્ફુરદ્દશનદંષ્ટ્રા ચ સુમેરુયુગલસ્તની ।
સા સહસ્રભુજા દુર્ગા સુચિત્રજઘના તથા ॥ ૧૬૫॥

સૌભાગ્યશાલિની દુર્ગા સચ્ચિદાનન્દવિગ્રહા ।
સર્વદેવમયી દુર્ગા સર્વદેવશરીરજા ॥ ૧૬૬॥

સર્વેશ્વરી તથા દુર્ગા સર્વલોકમહેશ્વરી ।
સર્વાઙ્ગભૂષણા દુર્ગા સર્વાનન્દપયોનિધિઃ ॥ ૧૬૭॥

સર્વભયાપહા દુર્ગા સર્વકામદુધસ્તની ।
સુકર્કશસ્તની દુર્ગા સુશ્વેતસ્તનમણ્ડલા ॥ ૧૬૮॥

સા સિદ્ધકુઞ્જિકા દુર્ગા સા સત્ત્વૈકગુણાશ્રયા ।
સુખમયી તથા દુર્ગા તથૈવ સુરમોહિની ॥ ૧૬૯॥

સ્નેહમયી તથા દુર્ગા સર્વબાધાપહારિણી ।
સિદ્ધિપ્રદા તથા દુર્ગા તથૈવ સા સુધામયી ॥ ૧૭૦॥

હૃત્સંસ્થિતા તથા દુર્ગા હરિનેત્રકૃતાલયા ।
હંસયુક્તવિમાનસ્થા હિમાચલકૃતાશ્રયા ॥ ૧૭૧॥

દુર્ગા હંસસમારૂઢા હતદૈત્યમહાબલા ।
હિમાચલસુતા દુર્ગા ત્રિશૂલવરધારિણી ॥ ૧૭૨॥

હિમાચલસુતાનાથસંસ્તુતા જ્ઞાનરૂપિણી ।
હૃત્પુણ્ડરીકમધ્યસ્થા દુર્ગા હસ્તામ્બુજા તથા ॥ ૧૭૩॥

ક્ષોભિતાશેષપાતાલા દુર્ગા ક્ષેમકરી તથા ।
ક્ષુધારૂપા તથા દુર્ગા ત્રિધામાત્રાત્મિકા તથા ॥ ૧૭૪॥

સા દુર્ગા ક્ષાન્તિરૂપા ચ દુર્ગા ત્રિપુરસુન્દરી ।
દુર્ગા ત્રિજગદાધારા ત્રિંશલ્લોચનમાલિકા ॥ ૧૭૫॥

દુર્ગા ત્રૈલોક્યવાસીડ્યા ત્રિદશપરિવેષ્ટિતા ।

ત્રૈલોક્યત્રાણયુક્તા ચ ત્રિશૂલચન્દ્રધારિણી ॥ ૧૭૬॥

દુર્ગા વક્ત્રારવિન્દશ્રીદુર્ગા ત્રિનયના તથા ।
સા જ્ઞાનચિન્મયાતીતા સ્વયઞ્ચ જ્ઞાનચિન્મયી ॥ ૧૭૭॥

॥ નમસ્તસ્યૈ નમો નમઃ ॥

દુર્ગાસપ્તશતીસ્તોત્રં યથા લોકે મહીયતે ।
મધુરં મધુરાનન્દે સહસ્રમપિ કલ્પતામ્ ॥ ૧૭૮॥

દુર્ગા ભક્તસુભાવભાવિતમનાઃ પ્રેમાસ્પદં પ્રાપિતા
હર્ષોલ્લાસવિનોદમોદકરુણાસન્તાનસઙ્કાશિકા ।
સુપ્રીતા મુદિતા સ્તુતા વિનયિતા સમ્પૂજિતા વન્દિતા
માઙ્ગલ્યં વિતનોતુ લોકજનની સ્તોતુઃ સહસ્રાત્મિકા ॥ ૧૭૯॥

ઇતિ શ્રીદુર્ગાસપ્તશત્યોદ્ધૃતં સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

સઙ્કલનં તથા છન્દોબન્ધનઞ્ચ પ્રકાશનમ્ ।
દુર્ગાયાઃ સુમનસ્તુષ્ટ્યૈ વર્તતાં ચાત્મતૃપ્તયે ॥

– ભાવકઃ બટોહી ઝા
કેન્દ્રીય-સંસ્કૃત-વિદ્યાપીઠં
વિશાલ-ખણ્ડમ્-૪
ગોમતીનગરં, લખનઊ

Proofread by Kavitha Aanand

*Shri Durga Saptashati Sahasra Nama Stotram*
pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*